PSBB Learning Leadership Academy
Bangalore
Class:- VIII   Sub:- Sanskrit II Lang

Topic:- अपठितगद्यांशाः

# अनुच्छेदाः

## अनुच्छेदान् पठित्वा प्रश्नान् उत्तरत ।

1. कालिदासः संस्कृतवाङ्मयस्य उत्कृष्टः कविः । अयं हि कविकुलगुरुः इति प्रसिद्धः । एषः राज्ञः विक्रमादित्यस्य नवरत्नेषु एकः आसीत् । अयं महाकविः रघुवंशं, कुमारसंभवं नाम द्वे महाकाव्ये, मेघदूतं नामैकं खण्डकाव्यम्, मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् इति त्रीणि नाटकानि, ऋतुसंहारं नाम गीतिकाव्यं च रचितवान् । एतासु कृतिषु अभिज्ञानशाकुन्तलम् इति नाटकं विश्वप्रसिद्धं सर्वोत्तमं च । कालिदासस्य कल्पनाशक्तिः अद्भुता । अस्य प्रकृतिवर्णनं च स्वाभाविकम् । कालिदासः उपमासु सर्वान् अतिशेते । अत एव "उपमा कालिदासस्य" इति अस्य विषये प्रसिद्धा उक्तिः वर्तते । एतस्य कृतिषु बहुत्र उज्जयिनीवर्णनं दृश्यते । अनेन इदं कथयितुं शक्यते यत् अयम् उज्जयिनीनगर्याम् अवसत् इति । अतः प्रतिवर्षम् उज्जयिनीनगर्यां कालिदासजयन्ती उत्सवः महता वैभवेन समायोज्यते ।

I एकपदेन उत्तरत –

i) कालिदासः कासु सर्वान् अतिशेते ?____________

ii) सः कति नाटकानि अरचयत् ? ____________

iii) कालिदासेन रचितं गीतिकाव्यं किम् ? ____________

iv) कालिदासः कीदृशः कविः ? ____________

II पूर्णवाक्येन उत्तरत –

i) कालिदासस्य विषये का उक्तिः प्रसिद्धा वर्तते ?

____________________________________________

ii) कालिदासः कानि नाटकानि अरचयत्?

____________________________________________

____________________________________________

**III यथानिर्दिष्टम् उत्तरत –**

i) रचितवान्– प्रकृति – प्रत्यय विभागं कुरुत । ____________

ii) राज्ञः – मूलशब्दं विभक्तिं च लिखत । ____________

iii) प्रसिद्धम् – पर्यायपदं लिखत । ____________

iv) द्वे महाकाव्ये – अत्र विशेषणपदं किम् ? ____________

v) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत । ____________

2. एकस्मिन् ग्रामे चत्वारः बालकाः आसन् । तेषु त्रयः शास्त्रे निपुणाः, किन्तु अविवेकिनः आसन् । एकदा यदा ते वनमार्गेण गच्छन्ति स्म तदा एकस्य सिंहस्य मृतशरीरं दृष्टवन्तः । तदा तेषु एकः उक्तवान् – मित्राणि ! अस्माकं शास्त्रज्ञानस्य परीक्षणार्थम् उत्तमः अवसरः प्राप्तः । वयं मन्त्रशक्ति–प्रयोगेण एनं मृतं सिंहं सजीवं कारयामः ''इति । तत् श्रुत्वा अन्यौ द्वौ ''तथैव कुर्मः'' इति अवदताम् । परं बुद्धिमान् चतुर्थः तान् निवारयितुं प्रयत्नम् अकरोत् । सः मित्राणि उक्तवान् – ''कृपया एनं सिंहं मा जीवयन्तु । यदि सः सजीवः भविष्यति तदा अस्मान् एव हनिष्यति इति । किन्तु तस्य वचनं अन्ये न श्रुतवन्तः । तदा बुद्धिमान् बालकः झटिति धावित्वा वृक्षम् आरुह्य उपाविशत् । यदा मन्त्रप्रयोगेण सिंहः सजीवः कृतः तदा सः त्रीन् अपि बालकान् हतवान् । 'अविवेकः परमापदाम् पदम्' इति विलपन् बालकः गृहं गतः ।

**I एकपदेन उत्तरत –**

i) बालकाः केन मार्गेण गच्छन्ति स्म ? ____________

ii) बालकाः कथं सिंहं सजीवं कृतवन्तः ? ____________

iii) कति बालकाः शास्त्रे निपुणाः आसन् ? ____________

iv) किं चत्वारः अपि सिंहं सजीवं कर्तुम् ऐच्छन् ? ____________

**II पूर्णवाक्येन उत्तरत –**

i) बुद्धिमान् बालकः अन्यान् किं अवदत् ?

____________________________________________

____________________________________________

ii) त्रयः बालकाः कीदृशाः आसन् ?

_______________________________________________

III निर्दिष्टप्रकारेण उत्तरत –

i) एकस्मिन् ग्रामे–अत्र विशेषणपदं किम् ? ____________

ii) तथैव – सन्धिच्छेदं कुरुत । ____________

iii) प्राप्तः – प्रकृति – प्रत्यय विभागं कुरुत । ____________

iv) श्रुत्वा – पर्यायपदं लिखत । ____________

v) अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत । ____________

3. भारतस्य पुण्यनदीषु कावेरी अन्यतमा अस्ति । सा दक्षिणभारतस्य 'कोडगु' नाम पर्वतात् वहति । अस्याः उद्गमविषये एका पौराणिककथा वर्तते । महर्षिः अगस्त्यः यदा परमेश्वरस्य आज्ञया दक्षिणभारतम् आगतवान् तदा स्वकमण्डलौ सः गङ्गाजलम् आनीतवान् । यदा दक्षिणभारतम् अनावृष्ट्या पीडितम् आसीत् तदा करुणापरः गणेशमूर्तिः काकरूपेण आगत्य कमण्डलुम् अलुठत् । कमण्डलुतः निर्गता गङ्गादेवी नदीरूपेण प्रावहत् । सा एव दक्षिणगङ्गा इति विख्याता कावेरी नदी अस्ति । तस्याः प्रसादात् एव क्षेत्राणि सस्यश्यामलानि समृद्धानि च सन्ति । कावेरीतीरे अनेकानि तीर्थस्थानानि सन्ति । तेषु भूलोकवैकुण्ठः इति कीर्तितं श्रीरङ्गं सुप्रसिद्धम् । कावेर्यै नमः ।

I एकपदेन उत्तरत –

i) कावेरी कुतः वहति ? ____________

ii) कस्य आज्ञया अगस्त्यः दक्षिणभारतम् आगतवान् ? ____________

iii) किं क्षेत्रं भूलोकवैकुण्ठः इति कीर्तितम् ? ____________

iv) दक्षिणभारतं कया पीडितम् आसीत् ? ____________

II पूर्णवाक्येन उत्तरत –

i) कावेर्याः प्रसादात् क्षेत्राणि कीदृशानि भवन्ति ?

_______________________________________________

ii) गणेशः किं कृतवान् ?

_______________________________________________

III यथानिर्दिष्टम् उत्तरत –

i) आनीतवान् – प्रकृति–प्रत्यय विभागं कुरुत । ______________

ii) अतिवृष्टिः – विलोमपदं किम् ? ______________

iii) कमण्डलौ – विभक्तिः का ? ______________

iv) अनेकानि तीर्थस्थानानि – अनयोः विशेषणपदं किम् ? ______________

v) अस्य गद्यांशस्य उचितं शीर्षकं लिखत । ______________

5. प्रतिवर्षं भारतीयाः जनवरीमासस्य षड्विंशतितमायां तारिकायां गणतन्त्रदिवससमारोहं महता वैभवेन समायोजयन्ति । भारतस्य राजधान्यां दिल्लीनगर्यां विशेषरूपेण अयम् आकर्षकः महोत्सवः भवति । प्रातः देशस्य राष्ट्रपतिः राष्ट्रपतिभवनात् भारतद्वारम् आगच्छति । तदा सहस्रघ्नीनां निर्घोषेण राष्ट्रपतेः अभिनन्दनं भवति । ध्वजारोहणानन्तरं राष्ट्रपतिः पथसञ्चलनकार्यक्रमं विदेशीयेन अतिथिना सह पश्यति । युद्धोपकरणानां वाहनानां, सैनिकानाम्, आरक्षकाणां छात्राणां च पथसञ्चलनं भवति । अस्यां शोभायात्रायां प्रादेशिक – सङ्गीत – नृत्यादीनां प्रदर्शनम् अपि भवति । मार्गम् उभयतः संघट्टिताः जनाः कार्यक्रमं दृष्ट्वा मोदन्ते । एवं प्रकारेण अयं राष्ट्रियः उत्सवः भारतीयैः महता उत्साहेन मान्यते ।

I एकपदेन उत्तरत –

i) कुत्र आकर्षकः उत्सवः भवति ? ______________

ii) सहस्रघ्नीनां निर्घोषेण कस्य अभिनन्दनं भवति ? ______________

iii) गणतन्त्रदिवसः कस्यां तारिकायां समायोज्यते ? ______________

iv) भारतीयाः समारोहम् कथं समायोजयन्ति ? ______________